श्रीगणेशायनमः॥ अथश्रीसूक्तविधानं॥हिरण्यवर्णमितिपंचदशर्च
स्यसूक्तस्य॥लक्ष्मीऋषिः॥उत्तरचतुर्दशमंत्राणां॥आनंदकर्दम
श्रीत्रीतिगिरऋषयः॥आद्यानांतिसृणामनुष्टुप्॥चतुर्थस्यबृहती
पंचमषष्ठयोस्त्रिष्टुप्॥पंचम्यादिचतुर्दशपर्यंतामनुष्टुप्॥श्रीतिमृ
त्यप्रकारपंक्तिश्छंदः॥सर्वमंत्राणांश्रीरग्निश्चेत्युक्तेदेवते॥यंजना
निबीजानिस्वराशक्तयः॥ममुककामनासिद्ध्यर्थेजपेविनियोगः॥हिरण्या
यैनमः॥अंगुष्ठाभ्यांनमः॥चंद्रायैनमः॥तर्जनीभ्यांनमः॥रजतस्रजा
यैनमः॥मध्यमाभ्यांनमः॥हिरण्यस्रजायैनमः॥अनामिकाभ्योनमः॥
हिरण्याक्षायैनमः॥कनिष्ठिकाभ्यांनमः॥हिरण्यवर्णायैनमः॥करतल

करपृष्ठाभ्यांनमः॥हिरण्यायैनमः॥हृदयायनमः॥चंद्रायैनमः॥शिरसेस्वाहा॥
रजतस्रजायैनमः॥शिखायैवषट्॥हिरण्यस्रजायैनमः॥कवचायहुं॥हिर
ण्यायैनमः॥नेत्रत्रयायवौषट्॥हिरण्यवर्णायैनमः॥अस्त्रायफट्॥अथ
पंचदशस्थानेषुपंचदशमंत्रन्यासः॥मूर्द्धिकर्णनासामुखगुह्यहृदय
नाभिगुह्येषु॥पायूरूजानुपादचरणेषुन्यासेक्रमशः॥ॐहिरण्यव॰वहा॥
मूर्द्धि॥तांमआवह॰नहे॥नेत्रयो॥अश्वपूर्णां॰जुषतां॥कर्णयो॥कांसोस्मितां॰
हिरण्यं॰नासिके॥चंद्रांप्रभासो॰एोमि॥मुखे॥आदित्यव॰तपसो॥कंटे॥त
मैतुमां॰सहा॥बाह्वो॥क्षुत्पिपासा॰मलां॥हृदये॥ज्येष्ठालक्ष्मी॰क्षीये॥नाभौ॥
मनस॰काम॥गुह्ये॥कर्दमेन॰प्रजा॥अपाने॥आपस्रजं॰कुले॥ऊर्वो॥श्रि
यंवसे॥पादयो॰पद्मा॰वहा॥जानुनो॥आर्द्रायं॰क॰वहा॥जंघयो॥तांमआव॰वहे॥ १

पादयोः॥ अथ ध्यानं॥ अरुणकमलसंस्थातद्वदुंडवर्णा॥करकमलधृते
ष्टाभीतियुग्मांबुजाचा॥ मणिमुकुटविचित्रालंकृतावल्लभाते॥सकलवसुप्रद
नमातः संततंश्रीश्रीयैनमः॥एवंध्यात्वादेवेपिन्यासंकुर्यात्॥सूक्तंजप
त्॥अथपूजा॥षट्कोणंअष्टदलंचतुरस्रंयंत्रमालिख्य॥आग्नेयादिषट्को
णेषु॥ॐहिरण्यायैनमः॥चंद्रायैनमः॥रजतस्रजायैनमः॥पद्मावर्णायै
नमः॥पद्मस्थायैनमः॥हिरण्यवर्णायैनमः॥इतिप्रथमावरणं॥अथ
पूर्वाद्यष्टदलेषु॥पद्मायैनमः॥पद्मवर्णायैनमः॥पद्मस्थायैनमः॥आद्रा
यैनमः॥तर्पयंत्यैनमः॥तृप्तैनमः॥बलंदायैनमः॥स्वर्णप्राकारायैनमः॥
इतिद्वितीयावरणं॥इंद्रायनमः॥अग्नयेनमः॥यमायनमः॥निर्ऋतये
नमः॥वरुणायनमः॥वायवेनमः॥सोमायनमः॥ईशानायनमः॥ब्रह्मणे

ब्रह्मणेनमः॥ अधःशिक्षवेनमः॥ इतितृतीयावरणं॥ पूर्वादिक्षु॥ वज्राय
नमः॥ शक्तयेनमः॥ दंडायनमः॥ खड्गायनमः॥ पाशायनमः॥ अंकुशाय
नमः॥ गदायनमः॥ त्रिशूलायनमः॥ चक्रायनमः॥ पद्मायनमइतिनवा॥
इतिचतुर्थावरणं॥ एवं आवरणसहितोदेवीपंचदशामंत्रैःपंचदशोपचारैः
पूजयेत्॥ तद्यथा॥ आवाहनासनपाद्यार्घ्याचमनमधुपर्काभिषेकवस्त्र॥
वासोभूषणगंधाःसुमनोयुतधूपदीपनैवेद्यानि॥ सोद्वासनामिकुर्यात्॥
मुद्रियुतः॥ पंचदशाग्निरथमनुभिः॥ हिरण्यवर्णामित्यनयावाद्य आवा
हनास्थापनीसंरोधकरणीसंमिरोधिनीसंमुखीकरणीअवगुंठिनी
योनिमुद्राःप्रदर्श्य॥ तांम आवहेत्यनेन॥ अश्वपूर्वामित्यर्घ्यं॥ कांसो
स्मितामितिपाद्यं॥ चंद्रांप्रभासामित्याचमनं॥ आदित्यवर्णेतिपंचामृत॥

उपेतुमोमितिस्नानं॥क्षुत्पिपासामितिवस्त्रं॥गंधद्वारामितिभूषणं॥म
नसःकाममाकूतिमितिगंधं॥कर्दमेनेतिपुष्पं॥आपस्त्वन्नेतिधूपं॥
आर्द्रांपुष्करिणीमितिदीपं॥आर्द्रायःकरणीमितिनैवेद्यं॥ततोदद्यैक
लतांबूलादिनैवेद्यमंगलार्त्तिकंविधायपंचदशभिःऋग्भिःदद्यैआ
द्यंकृत्वा॥दद्यैआचमनंदद्या॥तोमआवहेतिनयादेवींउद्वासयेत्॥
ततःकृतांजलिःसन्श्रीसूक्तंजपेत्॥इतिपंचदशोपचारपूजा॥अ
थपुनश्चरणं॥परिषिंचेत्स्त्रीणिसूक्तैःस्नानकर्मणि॥आ
दित्यादिमुखेज्यायावतावच्चतर्पयेत्॥शुक्लप्रतिपदमारभ्ययावत्॥
द्वादशसहस्रंब्रह्मचर्यपरोमौनिशांतोविमलवस्त्रभद्रभूषणपु
ष्पानुलेपयेत्॥ततोऽतमधुराक्तैःपद्मैर्बिल्वसमिद्भिःपायसेन

घृतेनकेवलघृतेनपृथक्त्रीन्त्रीन्पलान्मेकेकेनजुहुयात्॥द्वादश्या
द्वादशब्राह्मणांश्चभोजयेत्॥कृतपुनश्चरणोक्तवतिद्रविलहोमसू
क्तविधिःसमाप्तः॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥छ॥